[१८६] आचारे[1]ऽवगल्भक्लीबहोडेभ्यः क्विब् वा [2]वक्तव्यः। (म. भा. २.२१)

अवगल्भते, अवगल्भायते। क्लीबते, क्लीबायते। [3]होडते, होडायते।

[१८७] सर्वप्रातिपदिकेभ्य इत्येके। (म. भा. २.२१)

अश्व इव आचरति अश्वायते, अश्वति। गर्दभायते, गर्दभति॥

## भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः। (१२/२६६७)

भृश इत्येवमादिभ्यः प्रातिपदिकेभ्योऽच्व्यन्तेभ्यो भुवि भवत्यर्थे क्यङ् प्रत्ययो भवति, हलन्तानां च लोपः[4]। अच्वेः इति प्रत्येकमभिसम्बध्यते। किमर्थं पुनरिदमुच्यते, यावता भवतियोगे च्विर्विधीयते, तेनोक्तार्थत्वाच् च्व्यन्तेभ्यो न क्यङ् भविष्यति (म. भा. २.२२)? [5]तत्सादृश्यप्रतिपत्त्यर्थं तर्हि च्विप्रतिषेधः क्रियते। अभूततद्भावविषयेभ्यो भृशादिभ्यः क्यङ् प्रत्ययः। अभृशो भृशो भवति भृशायते। शीघ्रायते।

भृश। शीघ्र। मन्द। चपल। पण्डित। [6]उत्सुक। उन्मनस्। [7]अभिमनस्। सुमनस्। दुर्मनस्। रहस्। रेहस्। शश्वत्[8]। बृहत्। वेहत्। नृषत्[9]। शुधि। अधर। ओजस्। वर्चस्[10]। भृशादिः।

अच्वेः इति किम्? भृशीभवति॥

## लोहितादिडाज्भ्यः क्यष्। (१३/२६६८)

लोहितादिभ्यो[11] डाजन्तेभ्यश्च भवत्यर्थे [12]क्यष् प्रत्ययो भवति। [13]लोहितायति, लोहितायते। डाजन्तेभ्यः – पटपटायति, पटपटायते।

[१८८] लोहितडाज्भ्यः क्यष् वचनम्, भृशादिष्वितराणि[14]। (म.भा. २.२४)

यानि लोहितादिषु पठ्यन्ते तेभ्यः क्यङ् एव, अपरिपठितेभ्यस्तु क्यष् एव भवति। वर्मायति, वर्मायते। निद्रायति, निद्रायते। करुणायति, करुणायते। कृपायति, कृपायते। आकृतिगणोऽयम्। तथा च ककारः सामान्यग्रहणार्थोऽनुबध्यते 'नः क्ये' (१.४.१५/२६५९) इति। न हि पठितानां मध्ये नकारान्तः शब्दोऽस्ति। कृभ्वस्तिभिरिव क्यषाऽपि योगे डाज् भवति इत्येतदेव वचनं ज्ञापकम्। अच्वेः इत्यनुवृत्तेरभूततद्भावे क्यष् विज्ञायते।

लोहित। नील। हरित[15]। पीत। मद्र। फेन। मन्द। लोहितादिः॥

## कष्टाय क्रमणे। (१४/२६७०)

क्यङ् अनुवर्तते, न क्यष्। कष्टशब्दाच् चतुर्थीसमर्थात् क्रमणेऽर्थेऽनार्जवे क्यङ् प्रत्ययो भवति। कष्टाय [16]कर्मणे क्रामति कष्टायते। अत्यल्पमिदमुच्यते (म. भा. २.२५)।

[१८९] सत्रकष्टकक्षकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम्। (म. भा. २.२५)

[17]कण्वचिकीर्षा [18]पापचिकीर्षा, तस्यामेतेभ्यः क्यङ् प्रत्ययो भवति। सत्रायते। कष्टायते। कक्षायते। [19]कृच्छ्रायते। गहनायते। कण्वचिकीर्षायाम् इति किम्? अजः कष्टं क्रामति (म. भा. २.२५)॥

---

1. गल्भ ड. 2. भवति फ. 3. विहोडते, विहोडायते ब. फ. म. भा. 4. भवति इत्यधिकम् क. 5. तत्सदृश° न्यास. प. मं, °प्रतिपत्त्यर्थे अ. ब. क. ग. 6. अण्डर कडर मेधा शुचि मन्द इत्यधिकम् क. 7. अतिमनस् क. 8. रोहत् रिफत् रेहत् भ्रमत् इत्यधिकम् अ. क. 9. ईषत् इत्यधिकम् क. 10. पयस् शुचिस् अन्धस् अञ्चत् प्रयत् इत्यधिकम् क. ड, सुवर्चस् अर्चिस् इत्यधिकम् अ.ड. 11. प्रातिपदिकेभ्यः इत्यधिकम् क.ड. 12. क्यष्वचनं क. 13. लोहितायति पटपटायते नास्ति क. 14. द्रष्टव्यानि इत्यधिकम् क. 15. दास इत्यधिकम् अ, चरित इत्यधिकम् ड. 16. क्रमणे ग. फ. 17. कण्वचिकीर्षायां क. फ. 18. पापचिकीर्षायां यक्ङ क. फ. 19. नास्ति ड.